

बुद्धत्व

सम्पादन
पं. बद्रीरत्न वज्राचार्य

पिकाक
कान्छाभाइ चक्रधर

नेपाःया बौद्ध धर्म अनुसारया

बुद्धपूजा
व
दानगाथा
भावनापूजा

सम्पादन

पं. बद्रीरत्न वज्राचार्य

पिकाक

कान्छाभाइ चक्रधर

सम्पादन : बद्रीरत्न वज्राचार्य
मन्त्रसिद्धि महाविहार, यें ।

पिकाक : कान्छाभाइ चक्रधर
फसिकेब, यें ।

पिथना तिथि : ११२१ चिल्लाथ्व अष्टमी
न्हापांखुसी द्वःछिगू

मू : धर्मदान

आखः : माधव खरेल
द्यबः आखः : मदनमुनि वज्राचार्य

थाकू : बी.एस.प्रि. प्रेस, लगनटोल, काठमाडौं ।

छत्वाःचा खँ

बुद्धपूजा धकाः बुद्धपिनिगु प्रतिमाय् पूजा ज्वलं दोहलपेबलय् ब्वनेगु वाक्य बोधिचर्य्यावतारय् च्वंगु सम्पादन यानाः तया। हानं मेगु छगू दान विइबलय् दान कायेबलय् ब्वनेगु वाक्य दान गाथा कपिशावदानय् च्वंगु तया। थ्व निगू किसिमयागु वाक्य तया। दकलय् च्वय् त्रिशरणगमण, पञ्चशिक्षा, मण्डल दोहलपेगु स्तुति नं तयाः च्वयागु खः, थ्वया लिसें न्ह्यागुं पूजा यायेबलय् मदयेकं मगाःगु भावनापूजाया लिसें महायान सूत्र छपुनापं तयाः न्ह्यब्वयाच्वना। थ्व सफूयात तःधंगु श्रद्धां छापय्याकाः माक्व खर्च हनाः निःशुल्कं प्रदान याःगु जुल। थ्व पुण्यद्वारा सर्वसत्त्व प्राणिपिं उद्धार जुयेमाल। थ्व सफू प्रकाशन याःम्ह कान्छासाहुया सम्बोधि मार्ग प्राप्त जुयेमाल। जिं धाःधाःथें च्वःम्ह जिम्ह शिष्य पुण्यरत्नया नं धर्मय् सेवा याये फयेमा। थ्व सफू छापय् यानाब्यूम्ह प्रेसयात नं धन्यवाद जुल।

सर्वकालं शुभं भवन्तु मङ्गलम्!

बद्रीरत्न वज्राचार्य
महाबौद्ध, यें।

थ:गु छत्वा:चा खँ

नमो बुद्धाय, नमो धर्माय, नमो संघाय !

न्हापांनिसें हे धलंवनेगु धालकि जित: तसकं य: । य:सां नं ता:लाके मफु । छन्हु चान्हय् २०३९ सालया असार महिनाय् न्ह्यलय् ला ज्वलय् जुइक जित: "अष्टमीब्रत छक्व: दनेगु यायेमाल का" धा:वल । सुनां धा:वल, गुम्हस्यां धा:वल व ला धायेमफु तर अथे मनय् भान जुल । जि भ्फसंग वन । मन तसकं आनन्द जुल । तसकं हे लय्ताया । अले, व हे २०३९ सालया कात्तिकया मुख:अष्टमीकुन्हुनिसें द्वादशतीर्थनिसें थिमिइ ला अष्टमी ब्रत दनेगु जुल धका: क्व:छिना । ब्रत दनेत गुरु छम्ह माल । उकिया निंतिं पं. बद्रीरत्न वज्राचार्य जुयाथाय् वना: इनाप याना । गुरुं 'जि मेथाय् धलं दंकाच्वना । प्यला न्याला मला:नि' धयाबिज्याात ।

लिपा, मनमय्जुं (फुसिंख्य:) निसें गुरुं अनुकम्पा तयाबिज्यासे तसकं हे न्ह्याइपुसेच्वंक ब्रत दंकाबिज्यात । थ्व धलं (ब्रत) स्वदँतक जुल । थ्व धुनेवं नेपाल महायान बौद्ध धर्मसंघपाखें स्वदँतक बुद्धपूजा जुल । अबलय् खड्गजोगिनीनिसें बुद्धपूजा वना । थ्व नं क्वचायेव हानं मेथासं न्ह्याका: वनेत बद्रीरत्न गुरुजुयाथाय् छेँय् वना: बुद्धपूजा वनेत सल्हा या:वना । गुरुं ज्यू धयाबिज्यात ।

अन गणेश मान नकर्मी दाइ, पुण्यरत्न तुलाधरजु, जि कान्छा चक्रधर स्वम्ह जाना बुद्धपूजा शुरु यानागु जुल ।

वंगु २०४६ सालया असारनिसें करुणामय पूजा जुल । थुगु करुणामय पूजा यायेत पुण्यरत्न तुलाधरयात 'छिं कोतः ज्वनाः बुद्धपूजा छक्वः यानांदिसँ' धकाः इनाप याना । वय्कलं 'ज्यूका जिं पूजा' यानाबिइ धयादिल । छुं ला लिपा वय्कः भ्रायामदिल । अनं लिपा जि थम्हं हे मसः मस्यूसां, गुरुया अनुकम्पां सःसःथे पूजा यानावयाच्वना । गणेशमान दाइनाप नं थाय् थासय् जिल्ला जिल्लाय् चाहुलाच्वनागु जुल । गुबलें दोलखा, गुबलें दाङ, सुर्खेत, वीरगञ्जया भिस्वाय् चैत्यपूजा, गुबलें चित्लाङ त्रिशुली आदि थासय् वनाः बुद्धपूजा याःवनाच्वना । लुम्बिनिइ ला प्यक्वःति हे थ्यन जुइ ।

गुरुया अनुकम्पा दसेंलिं बुद्ध जन्मभूमि लुम्बिनी क्यबय् ब्रत दनाः पूजायानागु ला दहे दु । लुम्बिनीया अशोक स्तम्भ लूगु सञ्छिदँया लसताय् च्यागः बसय् जायेक मनूत च्वनाः जिपिं अन वना । उकुन्हुया दिनय् गुरु पं. बद्रीरत्न वज्राचार्यया आचार्यत्वय् दुर्लभ प्रव्रज्या सम्बर कयाः बुद्धधर्मय् दीक्षित जुयागु खँ ल्वःमंके मफइगु लसताया खँ जुल । थुकथं करुणामय सेवा पूजा खलः नीस्वनाः थौंया अद्यापि (थौंकन्हय् विहारपूजा यानावयाच्वनागु) मदिक्क न्ह्यानावने खनाच्वंगु भ्री सकलया भारयया खँ थें तायेकाच्वना । थुगु ज्याय् धर्मपासापिं आपालंसिगु ग्वाहालि दुगु

लुमंके बहः जू । थ्व ज्वलय्-दिव्यरत्न तुलाधर, जीवरत्न तम्राकार, गंगाराम मानन्धर, बलराम नकःमि, सानुज्योति शाक्य, बाबुरत्न स्थापित तथा अन्य सकल धर्मगोष्ठी पासापिनिगु स्यल्लाःगु ग्वाहालिया लागि गुण ग्रहण यासे सुभाय् देछायाच्वना । थी थी थाय्या विशेष यैं, यल, ख्वप, थिमि, नगदेश, किपू, पांगा, भोँट, आदि थासं बिज्याःपिं, भ्काःपिं सकल धर्मपासापिं छथासं मुनाः भजन, बुद्धपूजा आदिइ न्ह्यानाच्वनेगु ज्याय् ब्वति काःबिज्याःपिं, भ्काःपिं सकल धर्मपासापिन्त दुनुगलंनिसं साधुवाद बियाच्वना । अन्तय्, गुरुया धर्मदेशनां लाभान्वित जुइ खंगु दु, वसपोलयात सदां वन्दना याना । थथे हे ज्ञानी गुरुजु नं इलय् ब्यलय् बिज्यानाः पूजा न्ह्याकाः धर्मकथा नापं कनाबिज्याःगु दु, वसपोलयात नं दुनुगलं निसें सुभाय् बियाच्वना ।

थौँया थुगु पुण्यदिनय् श्री वज्राचार्य गुरुपिन्त पिण्डपात्रया लिसें सफू पिथनाः देछायेदयाः तसकं लय्तायाच्वना । थुगु सफूयात उसिमचासें छक्वः इनाप याथेवं हे तयार यानाः पिकायेत बियाबिज्याःम्ह पं. गुरु बद्रीरत्न वज्राचार्ययात हानं छक्वः श्रद्धाया स्वां दोहलपा च्वना । अथे हे पुण्यरत्न गुरुजुं नं थुगु ज्याय् तिबः बियाबिज्याःगुलिं वसपोलयात नं दुनुगलंनिसें सुभाय् देछायाच्वना । थुलि हे धयाः थःगु खँ थनसं क्वचायेकाच्वना ।

स:मस:थें छुं खँ न्ह्यथनागुलिइ गनं द्वंबिद्वं दत धा:सा सकलं धर्मपासागिसं क्षमा याइ धैगु आशा यासे क्षमा प्रार्थना याना । सुभाय् !

सर्वकालं शुभं भवन्तु मङ्गलम् !

थिमि, चपाच्व (मध्यपुर)
थौंकन्हय्– यैं, रंजना हल न्ह्य:ने
११२१ चिल्लाथ्व अष्टमी

कान्छाभाइ चक्रधर
फोन नं. २४९११३

त्रिरत्न शरण गमन

अहमित्थंनामा यावज्जीवं
बुद्धं शरणं गच्छामि ।।
अहमित्थंनामा यावज्जीवं
धर्मं शरणं गच्छामि ।।
अहमित्थंनामा यावज्जीवं
संघं शरणं गच्छामि ।।

पञ्चशील

अहमित्थंनामा यावज्जीवं
प्राणातिपातावैरमणं शिक्षापदं समादियामि ।
अहमित्थंनामा यावज्जीवं
अदत्तादानावैरमणं शिक्षापदं समादियामि ।
अहमित्थंनामा यावज्जीवं
कामेसु मिथ्याचारावैरमणं शिक्षापदं समादियामि ।
अहमित्थंनामा यावज्जीवं
मृषावादावैरमणं शिक्षापदं समदियामि ।
अहमित्थंनामा यावज्जीवं
सुरामैरय मद्यप्रमादास्थानवैरमणं शिक्षापदं समादियामि ।

बुद्ध मण्डल दोहलपे

इत्यपि सो भगवानाहं संम्यक्सम्बुद्धो विद्याचरण सम्पन्न सुगत लोक विदनूत्तर पुरुषदम्य शारथिशास्ता देवानाञ्च मनुष्यानाञ्च बुद्धो भगवान् तस्मै बुद्ध रत्नालयं इदं पुष्प मण्डलं निर्यातयामि ॥

स्तुति

तृष्णा जिह्वमसद् विकल्प शिरसं प्रद्वेष चञ्चत्फणं ।
कामक्रोध विषं वितर्क दर्शनं राग प्रचण्डेक्षनम् ॥
मोहस्यं स्वशरीर कोटर शयं चितोरगं दारुणं ।
प्रज्ञा मन्त्र वलेन यःशमिवान्बुद्धाय तस्मै नम : ॥

धर्म मण्डल दोहलपे

नमस्तु सागर प्रवेशित शान्तो पादुकं निर्माणिकं तस्मै धर्म रत्नालयं इदं पुष्प मण्डलं निर्यातयामि ॥

स्तुति

यौजात्यादि दुःख तप्तमहतां चक्षुपदं प्राणिणां ।
यस्त्रैधातुक पञ्जरादहरहसत्वान्समा कर्षति ॥
अत्राणाञ्च जगत् समुद्धरतियः संक्लेश दुःखार्णवान् ।
संबुद्धाय पुट च्युताय महते धर्माय तस्मै नमः ॥

संघ मण्डल दोहलपे

संतितसंघै अनागामिनी फल प्रतिपन्नागा। संतित संघै श्रोतापत्ति फल प्रतिपन्नगा श्रोतापन्ना सकृदागामित संति संघै अनागामिनी फले प्रतिपन्नगा श्रोतापन्ना सकृदागामित संति संघै अर्हत् फले प्रतिपन्नगा अर्हतये भगवानार्य्य वैवर्तिक बोधिसत्त्व संघै आर्चनिय समाकर्णिय अञ्जकर्णिय अनूत्तर पुण्यक्षेत्र दर्शनिय लोकस्यतस्मै आर्यावलोकितेश्वराय पुष्प मण्डलं निर्य्यातयामि।

स्तुति

चत्वारः प्रतिपन्नागा भवसुखे चत्वार विद्वेषिण।
चत्वारश्च फलेस्थिता समरता शान्ता महायोगिनः॥
इत्यष्टौ वरपुङ्गला भगवता यस्मिन गणे ब्याकृता।
प्रज्ञाशील समाधि तप्त वपुषे संघाय तस्मै नमः॥

बोधिचित्त ग्रहण

तच्चित्तरत्नग्रहणाय सम्यक् पूजां करोम्येष तथागतानाम् ।
सद्धर्मरत्नस्य च निर्मलस्य बुद्धात्मजानां च गुणादधीनाम्
॥ १ ॥

मानसिक पूजा

यावन्ति पुष्पाणि फलानि चैव भेषज्य जातानि च यानि सन्ति
रत्नानि यावन्ति च सन्ति लोके जलानि च स्वच्छमनोरमाणि
॥ २ ॥

महीधरा रत्नमयास्त थान्ये वनप्रदेशाश्च विवेकरम्याः ।
लताः सुपुष्पा भरणोज्ज्वलाश्च द्रुमाश्च ये सत्फलनम्रशाखाः
॥ ३ ॥

देवादिलोकेषु च गन्धधूपाः कल्पद्रुमा रत्नमयाश्च वृक्षाः ।
सरांसि चाम्भोरुह भूषणानि हंसस्वनात्यन्तमनोहराणि
॥ ४ ॥

अकृष्टजातानि च शस्यजातान्यन्यानि वा पूज्यविभूषणानि ।
आकाशधातुप्रसरावधीनि सर्वाण्यपीमान्यपरिग्रहाणि ॥ ५ ॥

आदाय बुद्धया मुनिपुंगवेभ्यो निर्यातयाम्येष सपुत्रकेभ्यः ।
गृह्णन्तु तन्मे वरदक्षिणीया महाकृपा मामनुकम्पमाना
॥ ६ ॥

अपुण्यवानस्मि महादरिद्रः पूजार्थमन्यन्मम नास्ति किंचित् ।
अतो ममार्थाय परार्थचिता गृह्णन्तु नाथा इदमात्मशक्त्या
॥ ७ ॥

ददामि चात्मानमहं जिनेभ्यः सर्वेण सर्वं च तदात्मजेभ्य ।
परिग्रहं मे कुरुताग्रसत्त्वा युष्मासु दासत्वमुपैमि भक्त्या ॥ ८ ॥

परिग्रहेणास्मि भवत्कृतेन निर्भीर्भवे सत्वहितं करोमि ।
पूर्वं च पापं समतिक्रमामि नान्यच्च पापं प्रकरोमि भूयः
॥ ९ ॥

स्नान

रत्नोज्ज्वलस्तम्भमनोरमेषु मुक्तामयोद्भासिवितानकेषु ।
स्वच्छोज्ज्वलस्फाटिककुट्टिमेषु सुगन्धिषु स्नानगृहेषु तेषु ॥ १० ॥

मनोज्ञगन्धोदकपुष्पपूर्णैः कुम्भैर्महारत्नमयैरनेकैः ।
स्नानं करोम्येष तथागतानां तदात्मजानां च संगीतिवाद्यम्
॥ ११ ॥

चीवर वस्त्र

प्रधूपितैर्धौतमलैरतुल्यैर्वस्त्रैश्च तेषां तनुमन्मृषामि ।
ततः सुरक्तानि सुधूपितानि ददामि तेभ्यो वरचिवराणि ॥ १२ ॥

दिव्यैर्मुदश्लक्ष्णविचित्रशोभैर्वस्त्रै रलंकारवरै श्चतैस्तैः ।
समन्तभद्राजितमंजुघोषलोकेश्वरादीनपि मण्डयामि ॥ १३ ॥

सुगन्ध

सर्वत्रिसाहस्रविसारिगन्धैगन्धोत्तमैस्तातनुलेपयामि ।
सूत्तपृसून्मृष्टसुधौतहेमप्रभोज्ज्वलान् सर्वमुनीन्द्रकायान् ॥ १४ ॥

पुष्प

मान्दारवेन्दीवरमल्लिकाद्यैः सर्वैः सुगन्धै कुसुमैर्मनोज्ञैः ।
अभ्यर्चयाभ्यर्च्यतमान् मुनीन्द्रान् स्रगभिश्च मंस्थानमनोरमाभिः
॥ १५ ॥

धूप भोजन

स्फोतस्फुरद्गन्धमनोरमैश्च तान्धूपमेघैरूपधूपयामि ।
भोज्यैश्च खाद्यैर्विविधैश्च पेयैस्तेभ्यो निवेद्यं च निवेदयामि
॥ १६ ॥

प्रदीप

रत्नप्रदीपांश्च निवेदयामि सुवर्णपद्मेषु निविष्टपक्तीन् ।
गन्धोपलिप्तेषु च कट्टिमेषु किरामि पुष्पप्रकारान् मनोज्ञान्
॥ १७ ॥

स्तुति रत्नमाला

प्रलम्बमुक्तामणिहारशोभानाभास्वरान् दिग्मुखमण्डनास्तान् ।
विमानमेघान् स्तुतिगीतरम्यान् मैत्रीमयेभ्योऽपि निवेदयामि
॥ १८ ॥

छत्र

सुवर्णदण्डैः कमनौंयरूपैः संशक्तमुक्तानि समुच्छ्रितानि ।
प्रधारयाम्येष महामुनिनां रत्नातपत्राण्यतिशोभनानि ॥ १९ ॥

तूर्य

अतः परं प्रतिष्ठन्तां पूजामेघा मनोरमाः ।
तुर्यसंगीतिमेघाश्च सर्वसत्त्वप्रहर्षणा ॥ २० ॥

वन्दना

सर्वसद्धर्मरत्नेषु चैत्येषु प्रतिमासु च ।
पुष्परत्नादिवर्षाश्च प्रवर्तन्तां निरन्तरम् ॥ २१ ॥

मञ्जुघोषप्रभृतयः पूजयन्ति यथा जिनान् ।
तथा तथागतान् नाथान् सपुत्रान् पूजयाम्यहम् ॥ २२ ॥

स्वराङ्गसागरैः स्तोत्रैः स्तौमि चाहं गुणोदधीन् ।
स्तुतिसंगीतिमेघाश्च संभवन्त्वेष्वनन्यथा ॥ २३ ॥

सर्वक्षेत्रागुणसंख्यैश्च प्रणामैः प्रणमाम्यहम् ।
सर्वत्र्यध्वगतान् बुद्धान् सहधर्मगणोत्तमाम् ॥ २४ ॥

सर्वचैत्येनि वन्देऽहं बोधिसत्त्वाश्रयांस्तथा ।
नमः करोम्युपाध्यायान् अभिवन्द्यान् यतींस्तथा ॥ २५ ॥

बुद्धं गच्छामि शरणं यावदाबोधिमण्डत ।
धर्मं गच्छामि शरणं बोधिसत्त्वगणं तथा ॥ २६ ॥

पापदेशना

विज्ञापयामि संबुद्धान् सर्वदिक्षु व्यवस्थितान् ।
महाकारुणिकाश्चापि बोधिसत्त्वान् कृतांञ्जलिः ॥ २७ ॥

अनादिमति संसारे जन्मन्यत्रैव वा पुनः ।
यन्मया पशुनां पापं कृतं कारितमेव च ॥ २८ ॥

यच्चानमोदितं किंचिदात्मघाताय मोहितः ।
तदत्ययं देशयामि पश्चतापेन तापितः ॥ २९ ॥

रत्नत्रयेऽपकारो यो मातापितृषु वा मया ।
गरुष्वन्येषु वा क्षेपात्कःयवाग्वुद्धिभिः कृतः ॥ ३० ॥

अनेकदोषदुष्टेन मया पापेन नायकाः ।
यत्कृत दारुणं पापं तत्सर्वं देशयाम्यहम् ॥ ३१ ॥



दान गाथा

ॐ नमः श्री दीपङ्कर बुद्धाय

वसा लायेगु

भूमौ दुकूल सुकुमार विचित्र पट्टैः
सन्तारयेत्सुगतसंघ परिक्रमाय ।
येनाप्यते विपुल भोग्य महा निधानं
तेना वनी पतिरभूत्समवेषु तस्य ॥ १ ॥

लिचायेके

नकिञ्चिदुष्णोदक पाद्यमेवच
सुशीतलं स्वच्छ सुगन्धिकं तथा ।
करोति पादौ सुगतस्य श्रद्धया
ततः कुवेरत्व नुपैत्यसौ नरः ॥ २ ॥

ईलान प्यना बियेगु

वितानमुच्चैर्वितनाति संघे
त्रिलोक देवासुर सिद्ध बन्धः ।
यो दीप्त देहः सुविशाल वंशः
सद्धर्म देहो हृदिज प्रजेता ॥ ३ ॥

आसन

पर्य्यङ्क विस्तर समास्तृत तूलिका सु
सोमन्तिनी घन पयोधर पीडिताङ्गः ।
सं शेरते क्षितिभुजो निशियः प्रदत्त
दिव्यासनं शमित दोष गणोत्तमाय ॥ ४ ॥

सिन्हलं तिकेगु

श्रीखण्ड कुंकुम सुशोभित चन्दनानि
कुर्वन्तिते सतिलका निच बुद्ध संघे ।
ये प्राप्नुवन्ति जगतां तिलकोपमत्वं
सौन्दर्य रूप मृदु दिव्य विशाल वंशः ॥ ५ ॥

स्वान माला

गो वारिजं विविध पुष्प सुगन्धि युक्तं
श्रद्धान्विताः सुमनसा प्रतिपादयन्ति ।
ये सौगतार्घ्य सुगतोत्तम साङ्घिकेभ्य
स्ते प्राप्नु वन्ति सुरराज महेन्द्रलक्ष्मीः ॥ ६ ॥

धूप

साँयोगिकं सहज सौरभ धूप बासं
भक्त्या ददाति सुगताय ससाङ्घिकाय ।
ये प्राप्नुवन्ति विपुलां धनधान्य भोगान्
सम्बुद्ध मव्यय पदं खलु ते लभन्ते ॥ ७ ॥

दीप

तै लाज्यभ्यक्तंच यथोपनीतं
ये साङ्घिकेभ्यः प्रतिपादयन्ति ।
सन्दर्शनीया नयनाभिरामा
भवन्ति ते दिव्य सुखोपभोग्याः ॥ ८ ॥

सलाम

यः शुभ्रां कठिनीं स्वच्छा मृजुं येन प्रयच्छति ।
विशाल बुद्धि पाण्डित्यं जायते भुवि जन्मनि ॥ ९ ॥

मुलुसुका

धीरो विनीतो गुणवान वीर्य्य सम्पन्न बुद्धिमान् ।
सूत्र सूची प्रदानेन नाभि जानाति दुर्गतीम् ॥ १० ॥

चिकं भौंचा

प्रशन्न वर्णा मृदु पाणि पादाः
महा बलाः शत्रुभिरप्रघृष्या ।
तैल प्रदानेन भवन्ति मर्त्याः
सुरूप रूपा सुख माप्नुवन्ति ॥ ११ ॥

तुफि

सन्मार्जनीं ये प्रददन्ति सङ्घे
त्रिरत्न देवालय शुद्ध हेतोः ।
ते शुद्ध शीला विमलाभिरामा
विकल्पषा सद्गुण भाव युक्ताः ॥ १२ ॥

लाखी

ये भक्ति पूर्नैरुदकार्य हेतो-
मौंजीय पाशं प्रददन्ति सङ्घे ।
कमात्सुवंशे परिवार युक्ताः
स्ते दिव्य लोके ह्यमृतं लभन्ते ॥ १३ ॥

गुलुपाः बियेगु

सौवर्ण रौप्यं विविध धातुज मृण्मयंवा
साल्योदनैः सुपरिपूर्ण सुपिण्डपात्रम् ।
भक्त्या ददन्ति सततं जिन साङ्घिकेभ्यः
स्यात्तस्य पुण्य मसमं फलमप्रमेयम् ॥ १४ ॥

वीवह ता

व्रीहिञ्च धान्यं भुविसं प्रजातं
श्रद्धान्वितं यः प्रददाति सङ्घे ।
इष्ट फलं तस्य भवेत्स नित्यं
सर्वार्थ कामं समुपै त्यसौ नरः ॥ १५ ॥

वस्त्र

यज्ञोपवीतं सुकुमार वासं
सम्पादयन्तीह गणोत्तमेभ्यः ।
भूरिष्ट कोषं समवाप्य भूय
स्ते प्राप्नुवन्तीन्द्रपदं विशालम् ॥ १६ ॥

क्षीर

माहिष्य गोरसबरं कनिकान्वितं ये
वैकृत्य तण्डुल सितार्द्रक लावणंते ।
तस्मै ददाति सततं जिन साङ्घ्रि काय
सं प्राप्नुवन्त्युचित भोग्य सराज लक्ष्मीः ॥ १७ ॥

फल मूल

धात्री हरीतकीरम्भा चूतञ्च फनसादिकम् ।
स्कन्द मूला दिकंदानं यथेप्सित फलं लभेत् ॥ १८ ॥

लंख दान

सुशीतलं स्वच्छ सुगन्धितोयं
स्वादान्वितं ये मुनि वारि पात्रम् ।
ददाति सङ्घार्य्य गणोत्तमेभ्य-
स्तूर्णां नवेत्यार्य्य पदं लभन्ते । १९ ॥

गुलः वासः आदि

न ब्याधि रोगं न च वृद्ध भावं
आरोग्यता नित्य मनन्त भोग्यम
भवेत्सुधीरः सुविशाल वंशो
भैषज्य दानात्लभते मनुष्यः ॥ २० ॥

दक्षिणा

यथानुलभ्यते द्रव्यं दक्षिणां यः प्रयच्छति ।
धर्मार्थं काममोक्षञ्च प्राप्नोति भक्ति मानसं ॥ २१ ॥

दान प्रशंसा

दानं विभुषणं लोके दानं दुर्गति निवारणम् ।
दानं स्वर्गस्य सोपानं दानं शान्तिकरं शुभम् ॥ २२ ॥

दान शील तथा ज्ञान प्रशंसा

दानेन भोगान्नपरो प्रतापा–
च्छीलेन स्वर्गं नगिरि प्ररोहात् ।
सत्येन शौच्यं न जल प्रवेशा–
ज्ज्ञानेन मोक्षं न शरीर शोषात् ॥ २३ ॥

अदत्त दान फल

अदत्त दानेन दरिद्र भावं
दारिद्र्य भावेन करोति पापम् ।
पापं च कृत्वा नरके प्रयान्ति
नरकादि मुक्तं पुनरेव पापम् ॥ २५ ॥

दान शील ज्ञान तथा भाव प्रशंसा

दरिद्र नासनं दान शीलं दुर्गति नाशनम्
अज्ञानं नाशनं प्रज्ञा भावना भव नाशनम् ॥ २६ ॥

यल पञ्चदान

शुक्ल पक्षे नभाष्टम्या मुषाया मुदयो रबेः ।
पिण्डपात्रादिकं दानं स्नानं चापि प्रकल्पयेत् ॥ २७ ॥

चतुर्युगादि पर्व

कृत श्रावण पूर्वाण्हे कृष्ण पक्ष त्रयोदशी
माघे पूर्णेपि मध्यान्हे त्रेतानाम युगोदयः ॥ २८ ॥
वैशाख शुक्ल सन्ध्यायां द्वापरश्च तृतीयकः ।
कार्तिक शुक्क नवम्यां अर्द्व रात्रौ कलिर्युगः ॥ २९ ॥
ए ते युगोदये दानं दद्याद्वै द्विपदोत्तमे ।
सर्वेषां पुण्य संख्यास्ति तेषां संख्या नविद्यते ॥ ३० ॥

उत्तम प्रशंसा

पुण्यं नराणां तमसि प्रदीपं
भयेषु रक्षा व्यसनेषु वन्धुम् ॥
रजासु भैषज्य मनुत्तरञ्च
प्रबुद्ध संसार महा समुद्रे ॥ ३१ ॥

दीपङ्कर निवृत्ति प्रशंसा

यथागत स्तथायातो दीपङ्करो मुनीश्वरः ॥
अथ खलु राजा भगवन्तमेतदवोचत् ॥ ३२ ॥

प्रार्थना

अद्यमे सफलं जन्म सफलं जीवितञ्चमे ।
अद्य बुद्ध कुले जातो बुद्ध पुत्रोस्मि साँप्रतम् ॥ ३३ ॥

आशीर्वाद

पराभवन्तु सदा सुखी आयु आरोग्य सम्पदम् ॥ ३४ ॥

इति दान गाथा

–: समाप्त :–

भावना पूजा

स्वां छायेगु वाक्य

स्वभावशुद्धाः सर्वधर्माः स्वभावशुद्धोऽहं
शून्यता ज्ञानवज्रस्वभावात्मकोऽहम् ॥

आवाहन (धूप छाये वाक्य)

भगवन् श्री अमुक सद्वज्र विद्याराजं नमोस्तुते ।
कर्तुमिच्छामि ते नाथं मण्डलम् करुणात्मकम् ॥
शिष्यानामनुकम्पार्थं युष्माकं पूजनाय च ।
तन्मे भक्तस्य भगवन् प्रशादं कर्त्तुमर्हसि ॥
समन्वाहरन्तु मां बुद्धाः जगदर्थक्रियार्थदाः ॥
फलस्थाः बोधिसत्त्वाश्च याश्चान्या मन्त्र देवताः ॥
देवता लोकपालाश्च भूताः सम्बोधिसाधिताः ।
शासनाभिरताः सत्वाः येकेचिद्वज्रचक्षुणः ॥
अमुकोऽहं महावज्री अमूकोदयमण्डलम् ।
करिष्यामि जगद्छुद्ध्यै यथा शक्त्युपचारतः ॥
अनुकम्पामुपादाय सशिष्यस्य च तन्मम् ।
मण्डले सहिताः सर्वे सान्निध्यं कर्तुमर्हथ ।
ॐ आः हूँ वज्रधूपं निर्यातयामि वज्र धूपं प्रतिच्छ स्वाहा ॥

अध्येषणा वाक्य (जाकिं पूजा याये)

अद्येमे सफलं जन्म सफलं जीवितञ्चमे ।
समये सर्वदेवानां भाविताऽहं न संशयः ।
अवैवर्ती भविष्यामि बोधिचित्तैकचेतसा ॥
तथागतकुलोत्पत्तिर्ममा ह्यस्यान्न संशयः ।
अग्रो मे दिवसो ह्यद्य यज्ञो मेऽद्य ह्यनुत्तरः ॥
सन्निपातो भवेदद्य सर्वबुद्ध निमन्त्रणात्
ओँ कुसुमाञ्जलिनाथ होः ॥

धारामण्डल पात्तनम्
(लः छतुलु, जाकि निगः मण्डलय् तये)

ॐ वज्रोदके हूँ ॥
ॐ वज्रभूमौ सुरेखे सर्वतथागताधिष्ठानाधितिष्ठन्तु स्वाहा !
ॐ सुवर्ण जलघोर स्वाहा ॥

सिन्दूर (सिन्हः तिके)

इदन्ते परमं गन्ध पवित्रं घ्राण तर्पणम् ।
ददामि परमं भक्त्या प्रतिगृह्ण यथासुखम् ॥

(सिन्दूरं सजलं शान्तं विचित्रं सुरसान्वितम् ।
निर्यातयाम्यहं प्रीत्या सर्वसिद्धिं प्रयच्छमे ॥)
ॐ वज्रगन्धे स्वाहा !
ॐ आः हूँ वज्रसिन्दूर तिलकभूषणे स्वाहा ॥

यज्ञोपवीत (जजमका)

ओँ वज्रवस्त्रालंकार पूजामेघसमुद्रस्फरण यज्ञोपवीतं बोध्यङ्ग दृढ कवच वज्र वस्त्रवाससे स्वाहा !

पुष्पारोहणम् (स्वां छाये)

समस्ति स्वस्ति वः कुल्तां बुद्धा स्वस्ति देवाः सशक्रकाः ।
स्वस्तिः सर्वाणि भूतानि सर्वकालं दिशन्तु वः ॥
बुद्धपुण्यानुभावेन देवतानां मतेनच ।
योयोऽर्थः समभिप्रेतः सर्वोर्थो ह्य समृध्यताम् ॥
स्वस्ति वो द्विपदे भोन्तु स्वस्तिर्वोस्तु चतुष्पदे ।
स्वस्ति वो वज्रतां मार्गे स्वस्ति प्रत्यागतेषु च ॥
स्वस्ति रात्रौ स्वस्ति दिवा स्वस्ति मध्य दिनेस्थिते ।
सर्वत्र स्वस्ति वो भोन्तु माचैषां पापमागमत् ॥
सर्वे सत्त्वाः सर्वे प्राणाः सर्वे भूताश्च केवलाः ।
सर्वे वै सुखिनः सन्तु सर्वे सन्तु निरामयाः ॥

सर्वे भद्राणि पश्यन्तुमा कश्चित्पापमागमत् ।

यानीहः भूतानि समागतानि स्थितानि भूमावथवान्तरिक्षे ।

कुर्वन्तु मैत्री सततं प्रजासु दिवा च रात्री च चरन्तु धर्मम् ।

ॐ आः हूँ वज्र पुष्पं प्रतीच्छ स्वाहा !

होजा, नैवेद्य, समयान्नादि

ॐ वज्र समयाचारं खाज्यभोज्य दिकं प्रभो ।

महायान षड्रससंयुक्तं वर्णगन्धरसोपेतं प्रतिगृह्णयथा सुखम् ॥

(नैवेद्यं सर्वसंयुक्तं खाज्यभोज्यसमन्वितम् ।

वर्णगन्धरसोपेतं प्रतिगृह्ण यथा सुखम् ॥)

ॐ वज्र नैवेद्यं प्रतीच्छ स्वाहा ।

मत बिये

नेत्राभिरामा बहुरत्नकोषा नराधिपैरर्चितपादपद्मा ।

ज्ञानप्रदीपा हतमोहजाला ये दीपमाला रचयन्ति तत्र ॥

ॐ आः वज्रदीपे ह्रीं प्रतीच्छ स्वाहा !

तायं पुज्याये

ये धर्मा हेतु प्रभवा हेतुस्तेषां तथागतः ।

ह्यवदत्तेषाञ्च यो निरोध एवं वादी महाश्रमणः ॥

जाकि स्वां लखय् भुना: पुज्याये

ॐ अकारोमुख सर्वधर्माणामाद्यनुत्पन्नत्वात् ।

ॐ आः हूँ फट् स्वाहा !

दक्षिणा छाये

मञ्जुश्रीये कुमारभूताय बोधिसत्त्वाय महासत्त्वाय महाकारुणिकाय तण्डुलदेकवक्षणां संप्रदोषयाम्यहम् ॥

शताक्षर

ॐ वज्रसत्त्व समय मनुपालय वज्रसत्त्व त्वेनो प्रतिष्ठो दृढो मे भव सुतोष्यो मे भव सुपोष्यो मे भव अनुरक्तो मे भव सर्वसिद्धि मे प्रयच्छ सर्वकर्म सुचमे चित्त श्रियंकुरु हूँ हहहह होः भगवन् सर्व तथागत वज्र मामे मुञ्च वज्रीभव महासमयसत्त्व आः ॥

